2026

संस्कृतसाहित्यम्

MASSC201

गद्यसाहित्यं चम्पूसाहित्यं च

पूर्णाङ्काः - 80

समयः- 3 घण्टा

(The figures in the margin indicate full marks for the questions)

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् **1×10=10**

1. हर्षचरिते कति उच्छ्वासाः वर्तन्ते ?
2. हर्षवर्धनस्य पितुः नाम किमासीत् ?
3. राज्यश्र्याः पत्युः नाम् किमासीत् ?
4. राज्ञः प्रभाकरवर्धनस्य मरणात्पूर्वमेव अग्निप्रवेशं कः करोति ?
5. हर्षचरितं विहाय कविबाणस्यापरैका रचनोल्लिख्यताम् ?
6. 'नलचम्पू' इत्यस्य अपर नाम किम् ?
7. नलचम्पूकाव्यस्य उपजीव्यग्रन्थः कः ?
8. 'नलचम्पूकाव्ये' कति उच्छ्वासाः सन्ति ?
9. नलचम्पूग्रन्थस्य मङ्गलाचरणे कस्याः देवतायाः स्तुतिः विद्यते ?
10. राज्ञः नलस्य राजधानी कुत्र आसीत् ?

अधोलिखितानां पञ्चानां व्याख्या विधेया - **6×5=30**

11. लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया
    बन्धनपाशाः, यदाकृष्टास्तिर्यञ्चोऽप्येवमाचरन्ति ।
12. मातापितृसहस्राणि पुत्रदारशतानि च ।
    युगे युगे व्यतीतानि कस्य ते कस्य वा भवान् ॥
13. वाचः काठिन्यमायान्ति भङ्गश्लेषविशेषतः ।
    नोद्वेगस्तत्र कर्तव्यो यस्मान्नौको रसः कवेः ॥
14. सोऽहं हंसायितुं सोहाद् बकः पङ्गुर्यथेच्छति ।
    मन्दधीस्तद्वदिच्छामि कविवृन्दारकायितुम् ॥
15. उदात्तनायकोपेता गुणवद्वृत्तमुक्तका ।
    चम्पूश्च हारयष्टिश्च केन न क्रियते हृदि ॥
16. जयति मधुसहायः सर्वसंसारवल्ली-
    जननजरठकन्दः कोऽपि कन्दर्पदेवः ।
    तदनु पुनरपाङ्गोत्संग सञ्चारितातां
    जयति तरुणयोषिल्लोचनानां विलासः ॥

17. प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः ।
भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः॥

निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् - **10×4=40**

18. संस्कृतगद्यकविषु बाणभट्टस्य स्थानमालोच्यताम् ।
19. संस्कृतगद्यसाहित्यस्य उत्पत्ति-विकासविषये एको नातिदीर्घः प्रबन्धो लिख्यताम्।
20. हर्षचरितस्य पञ्चमोच्छवासस्य कथावस्तु सरलभाषया उपस्थापयत ।
21. नलचम्पूकाव्यानुसारम् आर्यावर्तवर्णनं समासेन लिखत ।
22. नलचम्पूकाव्यस्य प्रथमोच्छवासानुसारं राज्ञः नलस्य वर्णनं समुपस्थापयत ।
23. नलचम्पूदिशा महामन्त्रिणः श्रुतशीलस्य विषये संक्षेपेन लिखत ।

****